तंत्रोक्त रात्रि सूक्तं

तंत्रोक्त रात्रि सूक्तं

विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीं |
निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः || 1 ||

ब्रह्मोवाच |
त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका |
सुधा त्वमक्षरे नित्ये त्रिधा मात्रात्मिका स्थिता || 2 ||

अर्धमात्रास्थिता नित्या यानुच्चार्या विशेषतः |
त्वमेव संध्या सावित्री त्वं देवी जननी परा || 3 ||

त्वयैतद्धार्यते विश्वं त्वयैतत्सृज्यते जगत् |
त्वयैतत्पाल्यते देवि त्वमत्स्यंते च सर्वदा || 4 ||

विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने |
तथा संहृतिरूपांते जगतोऽस्य जगन्मये || 5 ||

महाविद्या महामाया महामेधा महास्मृतिः |
महामोहा च भवती महादेवी महासुरी || 6 ||

प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी |
कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा || 7 ||

त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा |
लज्जा पुष्टिस्तथा तुष्टिस्त्वं शांतिः क्षांतिरेव च || 8 ||

खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा |
शंखिनी चापिनी बाणभुशुंडीपरिघायुधा || 9 ||

सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसुंदरी |
परापराणां परमा त्वमेव परमेश्वरी || 10 ||

यच्च किंचित् क्वचिद्वस्तु सदसद्वाखिलात्मिके |
तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा || 11 ||

यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत् |
सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः || 12 ||

विष्णुः शरीरग्रहणमहमीशान एव च |
कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत् || 13 ||

सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता |
मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ || 14 ||

प्रबोधं न जगत्स्वामी नीयतामच्युतो लघु |
बोधश्च क्रियतामस्य हंतुमेतौ महासुरौ || 15 ||

इति तंत्रोक्तं रात्रिसूक्तं |